## श्री गुरुचरणकमलेभ्यो नमः

## अमरनाथ यात्रा साधना-२०२२

चेतना मंत्र

मंत्र: || ॐ ह्रीं मम प्राण देह रोम प्रतिरोम चैतन्य जाग्रय ह्रीं ॐ नमः ||

सामग्री :- स्फटिक माला

जप संख्या :- 1 माला  नित्य

चैतन्य सिद्धि मंत्र

मंत्र: || ॐ आत्मप्राण चैतन्य पूर्णत्व सिद्धिवै नमः ||

सामग्री :- स्फटिक माला

जप संख्या :- 1 माला  नित्य

नित्य एक एक माला अवश्य करे |

यदि संभव होतो नित्य नीचे दिये चंद्रशेखर अष्टक एक बार पाठ करे |

# चंद्रशेखराष्टक स्तोत्रम्

चन्द्रशेखर चंद्रशखर चंद्रशेखर पाहि माम् ।
चन्द्रशेखर चंद्रशेखर चंद्रशेखर रक्ष माम् ॥
रत्नसानु-शरासनं रजताद्रि-शृंगनिकेतनं,
सिञ्जिनी कृत-पन्नगेश्वरमच्युतानन-सायकम् ।
त्रिप्रदग्धपुर त्रयं त्रिदिवालयैरभिवन्दितं,
चन्द्रशेखर माश्रये मम किं करिष्यति वै यमः ॥
पञ्चपादप-पुष्पगन्ध-पदाम्बुज-शोभितं
भाललोचन-जातपावक-दग्धमन्थन-विग्रहम् ।
भस्मदिग्ध-कलेवरं-भव-नाशनं भवमव्यय
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्ष माम् ॥
मत्तवारण-मुख्यचर्म कृतोत्तरीय-मनोहरं,
पङ्कजासन-पद्मलोचन-पूजिताङ्घ्रि-सरोरूहम्
देवसिन्धु तरङ्गिसीकर-सिक्त-शुभ्र जटाधरं
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्ष माम् ॥
यक्ष-राजसखं भगाक्षहरं भुजङ्ग-विभूषणं
शैल-राजसुता-परिष्कृत-चारुवाम-कलेवरम्
क्ष्वेडनीलगलं परश्वध धारिंणं मृगधारिणं
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्ष माम् ॥
कुण्डलीकृत-कुण्डलेश्वर-कुण्डलं वृष वाहनं
नारदादि-मुनीश्वर-स्तुत-वैभवं भुवनेश्वरम् ।
अन्धकान्वक-माश्रिता अमरपादप शमनान्तकं
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्ष माम् ॥
भेषजं भवरोगिणामखिलापदामपहारिणं
दक्ष यज्ञविनाशनं त्रिगुणात्मकं त्रिविलोचनं
भुक्ति-मुक्ति-फलप्रदं सकलाघसंघनिबर्हणं
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्ष माम् ॥

ONEPLUS

भक्तवत्सलमर्चितं निधिमक्षयं हरिदम्बरं
सर्वभूतपति परात्परमप्रमेय मनुत्तमम् ।
सोमवारिद-भूहुताशन-सोमपा-निलखाकृति
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्ष माम् ॥

विश्वसृष्टि-विधायिनं पुनरेव पालनतत्परं
संहरन्तमपि प्रपञ्चमशेष लोक-निवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथ-समन्वितं
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्ष माम् ॥

मृत्युभीत-मृकण्डसूनुकृतस्तवं शिवसन्निधौ
यत्र कुत्र च यः पठेन्न हि तस्य मृत्यु भयं भवेत् ।
पूर्णमायुररोगितामखिलार्थ सम्पदमादरं
चंद्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥

ONEPLUS